
हर हर शङ्कर ॐ जय जय शङ्कर





श्री-वेदव्यासाय नमः

## श्रीमद्-आद्य-शङ्कर-भगवत्पाद-परम्परागत-मूलाम्नाय-सर्वज्ञ-पीठम्
## श्री-काञ्ची-कामकोटि-पीठम्
## जगद्गुरु-श्री-शङ्कराचार्य-स्वामि-श्रीमठ-संस्थानम्

# ॥ पापहरा-दशमी-स्नान-अर्घ्य-विधिः ॥

ज्यैष्ठ-शुक्ल-दशमी / ५१२८-पराभवः-वृषभः ११
(२५.५.२०२६)

ज्येष्ठे मासि सिते पक्षे दशमी हस्तसंयुता।
हरते दश पापानि तस्माद् दशहरा स्मृता॥

The day when Shukla Paksha Dashami tithi of Jyeshtha Masa as per Chandra Mana joins with Hasta nakshatra is Papahara Dashami. On this day, one should perform snanam in holy rivers such as Ganga/Kaveri, or at least from a lake or well, or at home by meditating on holy rivers.

This rids us of ten types of sins that were accrued by our body, speech, and mind, and we will obtain happiness in this world and beyond and attain the greatest shreyas.

Today, after performing Nityakarma,

वेद-धर्म-शास्त्र-परिपालन-सभा
9884655618 8072613857 vdspsabha@gmail.com vdspsabha.org

# स्नान-सङ्कल्पः

आचमनम्। शुक्लाम्बरधरं + शान्तये। प्राणायामः।

तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव।
विद्याबलं दैवबलं तदेव लक्ष्मीपतेरङ्घ्रियुगं स्मरामि॥

अपवित्रः पवित्रो वा सर्वावस्थागतोऽपि वा।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥

मानसं वाचिकं पापं कर्मणा समुपार्जितम्।
श्रीरामः स्मरणेनैव व्यपोहति न संशयः॥
श्रीराम राम राम।

तिथिर्विष्णुस्तथा वारो नक्षत्रं विष्णुरेव च।
योगश्च करणं चैव सर्वं विष्णुमयं जगत्॥
श्रीहरे गोविन्द गोविन्द गोविन्द।

ममोपात्तसमस्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थम्, अद्य –
श्रीभगवतः विष्णोः नारायणस्य अचिन्त्यया अपरिमितया शक्त्या भ्रियमाणस्य महाजलौघस्य मध्ये परिभ्रमताम् **अनेककोटिब्रह्माण्डानाम् एकतमे** पृथिवी-अप्-तेजो-वायु-आकाश-अहङ्कार-महद्-अव्यक्तैः आवरणैः आवृते अस्मिन् महति ब्रह्माण्डकरण्डमध्ये चतुर्दशभुवनान्तर्गते भूमण्डले जम्बू-प्लक्ष-शाक-शाल्मलि-कुश-क्रौञ्च-पुष्कराख्य-सप्तद्वीपमध्ये **जम्बूद्वीपे** भारत-किम्पुरुष-हरि-इलावृत-रम्यक-हिरण्मय-कुरु-भद्राश्व-केतुमाल-नववर्षमध्ये **भारतवर्षे** इन्द्र-चेरु-ताम्र-गभस्ति-नाग-सौम्य-गन्धर्व-चारण-भरत-नवखण्डमध्ये **भरतखण्डे** सुमेरु-निषद-हेमकूट-हिमाचल-माल्यवत्-पारियात्रक-गन्धमादन-कैलास-विन्ध्याचलादि-**अनेकपुण्यशैलानां मध्ये** दण्डकारण्य-चम्पकारण्य-विन्ध्यारण्य-वीक्षारण्य-श्वेतारण्य-वेदारण्यादि-**अनेकपुण्यारण्यानां मध्ये** कर्मभूमौ रामसेतुकेदारयोः मध्ये भागीरथी-यमुना-नर्मदा-त्रिवेणी-मलापहारिणी-गौतमी-कृष्णवेणी-तुङ्गभद्रा-कावेर्यादि-**अनेकपुण्यनदी-विराजिते** इन्द्रप्रस्थ-यमप्रस्थ-अवन्तिकापुरी-हस्तिनापुरी-अयोध्यापुरी-द्वारका-मथुरापुरी-मायापुरी-काशीपुरी-काञ्चीपुर्यादि-**अनेकपुण्यपुरी-विराजिते** –

सकलजगत्स्रष्टुः परार्धद्वयजीविनः **ब्रह्मणः द्वितीयपरार्धे** पञ्चाशद्-अब्दादौ प्रथमे वर्षे प्रथमे मासे प्रथमे पक्षे प्रथमे दिवसे अह्नि द्वितीये यामे तृतीये मुहूर्ते स्वायम्भुव-स्वारोचिष-उत्तम-तामस-रैवत-चाक्षुषाख्येषु षट्सु मनुषु अतीतेषु सप्तमे **वैवस्वतमन्वन्तरे** अष्टाविंशतितमे कलियुगे प्रथमे पादे अस्मिन् वर्तमाने व्यावहारिकाणां प्रभवादीनां षष्ट्याः संवत्सराणां मध्ये

**पराभव**-नाम-संवत्सरे **उत्तरायणे वसन्त**-ऋतौ **वृषभ-अधिक-ज्यैष्ठ**-मासे **शुक्ल**-पक्षे **दशम्यां** शुभतिथौ **इन्दु**वासरयुक्तायाम् **उत्तरफल्गुनी**-नक्षत्रयुक्तायां **वज्र**-योगयुक्तायां **तैतिल**-करणयुक्तायाम् एवं-गुण-विशेषण-विशिष्टायाम् अस्यां **दशम्यां** शुभतिथौ

अनादि-अविद्या-वासनया प्रवर्तमाने अस्मिन् महति संसारचक्रे विचित्राभिः कर्मगतिभिः विचित्रासु योनिषु पुनःपुनः अनेकधा जनित्वा केनापि पुण्यकर्मविशेषेण इदानीन्तन-मानुष-द्विजजन्म-विशेषं प्राप्तवतः मम –

जन्माभ्यासात् जन्मप्रभृति एतत्क्षणपर्यन्तं बाल्ये कौमारे यौवने मध्यमे वयसि वार्धके च जागृत्-स्वप्न-सुषुप्ति-अवस्थासु मनो-वाक्-कायाख्य-त्रिकरणचेष्टया कर्मेन्द्रिय-ज्ञानेन्द्रिय-व्यापारैः सम्भावितानाम् इह जन्मनि जन्मान्तरे च ज्ञानाज्ञानकृतानां महापातकानां महापातक-अनुमन्तृत्वादीनां समपातकानाम् उपपातकानां मलिनी-करणानां गर्ह्यधन-आदान-उपजीवनादीनाम् अपात्रीकरणानां जातिभ्रंशकराणां विहितकर्मत्याग-निन्दितसमाचरणादीनां ज्ञानतः सकृत् कृतानाम् अज्ञानतः असकृत् कृतानां सर्वेषां पापानां सद्यः अपनोदनार्थं –

महागणपत्यादिसमस्तवैदिकदेवतासन्निधौ

मम एतज्जन्मनि जन्मान्तर-समुद्भूत-त्रिविध-कायिक-चतुर्विध-वाचिक-त्रिविध-मानस-इति-स्कान्दोक्त-दशविध-पापनिरास-त्रयस्त्रिंशत्-शत-पित्रुद्धार-ब्रह्मलोकावाप्त्यादि-फलप्राप्त्यर्थं पापहर-दशमी-महापुण्य-काले स्नानमहं करिष्ये।

Having performed Sankalpa thus, one can take bath in Ganga/Kaveri or other water bodies, or at home, with the thought of eliminating the ten different types of pāpams.

गङ्गा गङ्गेति यो ब्रूयात् योजनानां शतैरपि।
मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति॥

नमो भगवत्यै दशपापहरायै गङ्गायै नारायण्यै रेवत्यै शिवायै दक्षायै अमृतायै विश्वरूपिण्यै नन्दिन्यै ते नमो नमः

Praying to Ganga Devi thus, and performing snānam,

``मया कृतस्य अस्य दशहरा-स्नानस्य अङ्गतया अर्घ्य-प्रदानं करिष्ये'' इति सङ्कल्प्य and saying thus, take pure water in hands and offer Arghyam facing East.

नमः कमलनाभाय नमस्ते जलशायिने।
नमस्तेऽस्तु हृषीकेश गृहाणार्घ्यं नमोऽस्तु ते॥

जलशायिने नमः इदमर्घ्यम्।

एहि सूर्य सहस्रांशो तेजोराशे जगत्पते।
अनुकम्पय मां भक्त्या गृहाणार्घ्यं नमोऽस्तु ते॥

सूर्याय नमः इदमर्घ्यम्।

महाबल-जटोद्भूते कृष्णे उभयतो-मुखि।
वेदेन प्रार्थिते गङ्गे गृहाणार्घ्यं नमोऽस्तु ते॥

कृष्णावेण्यै नमः इदमर्घ्यम्।

Offer Arghyams thus.

As part of the snānam on this sacred day, one can perform dānam of ten types of fruits, rice (at least 16 handfuls) to the needy.

``मया कृत-दशहरा-स्नानाङ्गं यथाशक्ति दानमहं करिष्ये'' इति सङ्कल्प्य One can perform Sankalpa as above for performing dānam.

One can light 10 deepams in temples of Shiva/Vishnu in the evening.

## दश-विध-पापानि

अदत्तानामुपादानं हिंसा चैवाविधानतः।
परदारोपसेवा च कायिकं त्रिविधं स्मृतम्॥

पारुष्यमनृतं चैव पैशुन्यं चैव सर्वशः।
असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम्॥



9884655618 8072613857 vdspsabha@gmail.com vdspsabha.org

परद्रव्येष्वभिध्यानं मनसाऽनिष्टचिन्तनम्।
वितथाभिनिवेशश्च मानसं त्रिविधं स्मृतम्॥

एतैर्दशविधैः पापैर्दशजन्मसमुद्भवैः।
मुच्यते नात्र सन्देहः सत्यं सत्यं गदाधर॥

उद्धरेद् नरकाद् घोराद् दश पूर्वान् दशावरान्।
वक्ष्यमाणमिदं स्तोत्रं गङ्गाग्रे श्रद्धया जपेत्॥

---वर्षकृत्यदीपिका

# ॥ गङ्गादशहरास्तोत्रम्॥

**ब्रह्मोवाच**

नमः शिवायै गङ्गायै शिवदायै नमो नमः।
नमस्ते रुद्ररूपिण्यै शाङ्कर्यै ते नमो नमः॥१॥

नमस्ते विश्वरूपिण्यै ब्रह्ममूर्त्यै नमो नमः।
सर्वदेवस्वरूपिण्यै नमो भेषजमूर्तये॥२॥

सर्वस्य सर्वव्याधीनां भिषक्-श्रेष्ठे नमोऽस्तु ते।
स्थाणुजङ्गमसम्भूतविषहन्त्र्यै नमो नमः॥३॥

भोगोपभोगदायिन्यै भोगवत्यै नमो नमः।
मन्दाकिन्यै नमस्तेऽस्तु स्वर्गदायै नमो नमः॥४॥

नमस्त्रैलोक्यभूषायै जगद्धात्र्यै नमो नमः।
नमस्त्रिशुक्लसंस्थायै तेजोवत्यै नमो नमः॥५॥

नन्दायै लिङ्गधारिण्यै नारायण्यै नमो नमः।
नमस्ते विश्वमुख्यायै रेवत्यै ते नमो नमः॥६॥

बृहत्यै ते नमस्तेऽस्तु लोकधात्र्यै नमो नमः।
नमस्ते विश्वमित्रायै नन्दिन्यै ते नमो नमः॥७॥

पृथ्व्यै शिवामृतायै च सुवृषायै नमो नमः।
शान्तायै च वरिष्ठायै वरदायै नमो नमः॥८॥

उस्रायै सुखदोग्ध्र्यै च सञ्जीविन्यै नमो नमः।
ब्रह्मिष्ठायै ब्रह्मदायै दुरितघ्न्यै नमो नमः॥९॥

प्रणतार्तिप्रभञ्जिन्यै जगन्मात्रे नमोऽस्तु ते।
सर्वापत्प्रतिपक्षायै मङ्गलायै नमो नमः॥१०॥

शरणागतदीनार्तपरित्राणपरायणे।
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तुते॥ ११॥

निर्लेपायै दुर्गहन्त्र्यै दक्षायै ते नमो नमः।
परात्परतरे तुभ्यं नमस्ते मोक्षदे सदा॥१२॥

गङ्गे ममाग्रतो भूया गङ्गे मे देवि पृष्ठतः।
गङ्गे मे पार्श्वयोरेहि त्वयि गङ्गेऽस्तु मे स्थितिः॥ १३॥

आदौ त्वमन्ते मध्ये च सर्वं त्वं गां गते शुभे।
त्वमेव मूलप्रकृतिस्त्वं हि नारायणः परः।
गङ्गे त्वं परमात्मा च शिवस्तुभ्यं नमः शिवे॥ १४॥

य इदं पठति स्तोत्रं भक्त्या नित्यं नरोऽपि यः।
शृणुयाच्छ्रद्धया युक्तः कायवाक्चित्तसम्भवैः॥ १५॥

दशधा संस्थितैर्दोषैः सर्वैरेव प्रमुच्यते।
सर्वान्कामानवाप्नोति प्रेत्य ब्रह्मणि लीयते॥ १६॥

ज्येष्ठे मासि सिते पक्षे दशमी हस्तसंयुता।
तस्यां दशम्यामेतच्च स्तोत्रं गङ्गाजले स्थितः॥ १७॥

यः पठेद्दशकृत्वस्तु दरिद्रो वाऽपि चाक्षमः।
सोऽपि तत्फलमाप्नोति गङ्गां सम्पूज्य यत्नतः॥ १८॥

अदत्तानामुपादानं हिंसा चैवाविधानतः।
परदारोपसेवा च कायिकं त्रिविधं स्मृतम्॥ १९॥

पारुष्यमनृतं चैव पैशुन्यं चापि सर्वशः।
असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम्॥ २०॥

परद्रव्येष्वभिध्यानं मनसाऽनिष्टचिन्तनम्।
वितथाभिनिवेशश्च मानसं त्रिविधं स्मृतम्॥ २१॥

एतानि दश पापानि हर त्वं मम जाह्नवि।
दशपापहरा यस्मात्तस्माद्दशहरा स्मृता॥ २२॥

त्रयस्त्रिंशच्छतं पूर्वान् पितॄनथ पितामहान्।
उद्धरत्येव संसारान्मन्त्रेणानेन पूजिता॥ २३॥

नमो भगवत्यै दशपापहरायै गङ्गायै नारायण्यै रेवत्यै
शिवायै दक्षायै अमृतायै विश्वरूपिण्यै नन्दिन्यै ते नमो नमः॥

सितमकरनिषण्णां शुभ्रवर्णां त्रिनेत्रां
करधृतकलशोद्यत्सोत्पलामत्यभीष्टाम्।
विधिहरिहररूपां सेन्दुकोटीरजुष्टां
कलितसितदुकूलां जाह्नवीं तां नमामि॥ २४॥

आदावादिपितामहस्य निगमव्यापारपात्रे जलम्
पश्चात्पन्नगशायिनो भगवतः पादोदकं पावनम्।
भूयः शम्भुजटाविभूषणमणिर्जह्नोर्महर्षेरियम्
देवी कल्मषनाशिनी भगवती भागीरथी दृश्यते॥ २५॥

गङ्गा गङ्गेति यो ब्रूयाद्योजनानां शतैरपि।
मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति॥ २६॥

॥ इति स्कन्दे महापुराणे एकाशीति-साहस्र्यां संहितायां तृतीये काशीखण्डे
धर्माब्धिस्था श्रीगङ्गादशहरास्तुतिः सम्पूर्णा॥

❀❀❀